# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**-आचार्य (SEM-1) | **प्रश्नपत्रम्-३** (New & Old) | **गुणाः** - ७० |
| **विषयः** - पुराणेतिहासः | **कोड- CC- 4.1.2.** | **समयः** - २ तः ५ |
| **दिनाङ्कः** - १७/१२/२०१८ | **सन्दर्भग्रन्थः**- श्रीमद्भागवतमहापुराणम् - पञ्चमस्कन्धः | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ कस्याप्येकस्य ससन्दर्भं व्याख्यां कुरुत ।** **०५**

१. प्रियव्रतं कृतं कर्म को नु कुर्याद्विनेश्वरम् ।
यो नेमिनिम्नैरकरोच्छायां घ्नन् सप्त वारिधीन् ॥

२. गुरुर्न स स्यात्स्वजनो न स स्यात् पिता न स स्याज्जननी न सा स्यात् ।
दैवं न तत्स्यान्न पतिश्च स स्यान्न मोचयेद् यः समुपेत मृत्युम् ॥

**प्र-२ कस्याप्येकस्य सविस्तरणोत्तरं लिखत ।** **१०**

१. प्रियव्रतस्य आग्नीध्रस्योपरि चरितं कुरुत ।

२. वृषभदेवस्य राज्यशासनं लिखित्वा प्रजोपदेशं लिखत ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ एकस्य ससन्दर्भं व्याख्यां कुरुत ।** **०५**

१. नाहं विशङ्के सुरराजवज्रान्न त्र्यक्षशूलान्न यमस्य दण्डात् ।
नाग्न्यर्कसोमानिलवित्त पास्त्राच्छङ्के भृशं ब्रह्मकुलावमानात् ॥

२. रहूर्गणैतपसा न याति न चेज्यया निर्वपणाद् गृहाद्वा ।
न च्छन्दसा नैव जलाग्निसूर्यैर्विना महत्पादरजोऽभिषेकम् ॥

**प्र-४ एकस्य सविस्तरणोत्तरं लिखत ।** **१०**

१. जडभरतरहुगणयोः मेलनं तथा च भरतोपदेशं लिखत ।

२. भवाटवीवर्णनं लिखित्वा रहुगणसंशयनाशनं वर्णयत ।

**॥ तृतीयान्वितिः ॥**

**प्र-५ एकस्य गद्यखण्डस्य ससन्दर्भं व्याख्यां कुरुत ।** **०५**

१. स एव पुनर्निदाजगरगृहीतोऽन्धे तमसि मग्नः शून्यारण्य इव शेते नान्वत् किञ्चन वेद शव इवापविद्धः ।

२. मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतशिरसोगिरिशिखरस्थूलानि फलान्यमृतकल्पानि पतन्ति ।

**प्र-६ एकस्य विस्तरेणोत्तरं लिखत ।** **१०**

१. भरतवंशस्य वर्णनं लिखित्वा भुवनकोशवर्णनं कुरुत ।

२. भिन्न-भिन्न वर्षखण्डानां वर्णनं लिखत ।

**॥ चतुर्थान्वितिः ॥**

**प्र-७ एकस्य गद्यखण्डस्य ससन्दर्भं व्याख्यां कुरुत ।** **०५**

१. ग्रहर्क्षतारामयमाधिदैविकं पापापहं मन्त्रकृतां त्रिकालम् ।
नमस्यतः स्मरतो वा त्रिकालं न्यश्येत तत्कालजमाशु पापम् ॥

२. यन्नाम श्रुतमनुकीर्तयेदकस्मादाता वा यदि युतितः प्रलम्बनाद्वा ।
हन्त्यहः सपदि नृणामशेषमन्यं क शेषाद्भगवत आश्रयेन्मुमुक्षुः ॥

**प्र-८ एकस्य सविस्तरम् उत्तरं लिखत ।** **१०**

१. षड्द्विपानां लोकालोकपर्वतानां वर्णनं कृत्वा सूर्यस्य गतिनिरूपणं कुरुत ।

२. विभिन्नानां नरकाणां वर्णनं कुरुत ।

**प्र-९ दशप्रश्नानामुत्तराणि लिखत ।** **१०**

१. पञ्चमस्कन्धे कति अध्यायाः सन्ति?

२. सिन्धुसौविरदेशस्य राजा कः ?

३. मृगयोनिं कः प्राप्तवान्?

४. पञ्चमस्कन्धस्य नाम किम्?

५. प्रियव्रतस्य पुत्रः कः ?

६. जम्बुद्विपस्य राजा कः ?

७. भारतखण्डे कति द्वीपाः सन्ति?

८. द्वितीयजन्मनि भरतः कां योनिं प्राप्तवान्?

९. जडभरतः कस्मै उपदिशति?

१०. रहूगणः कस्य मुनेराश्रम् अगच्छत?

११. नरकाणं संख्या कति?

१२. संकर्षणस्य स्तुतिः केन कृता?

१३. प्लक्षद्विपस्य राजा कः ?

१४. सिंहिकायाः पुत्रः कः ?

१५. तलातललोकस्य अधः कः दानवः न्यवसत्?

--००--